শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীকুমারৱরদদেশিক ৱিরচিতম্

# ॥ শ্রীমদ্বেদান্তদেশিক ৱিগ্রহধ্যানম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমদ্ৱেদান্তদেশিক ৱিগ্রহধ্যানম্ ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী ।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি ॥

শ্রীমল্লক্ষ্মণ যোগীন্দ্র সিদ্ধান্ত ৱিজযধ্ৱজম্ ।
ৱিশ্ৱামিত্র কুলোদ্ভূতং ৱরদার্যমহং ভজে ॥

মনঃ প্রসূনস্তবকং মদীযং নাথস্য কৌতূহলমাতনোতু ।
বিভর্তি যো ভাগৱতেষু সর্ৱতন্ত্রস্ৱতন্ত্রেষু চ পারতন্ত্র্যম্ ॥ **1** ॥

শ্রীৱাদিহংসাংবুদ দেশিকেন্দ্র পাদাংবুজ দ্ৱন্দ্ৱ পরাগদৈৱম্ ।
শ্রীৱেঙ্কটেশং গুরুসার্ৱভৌমং চেতশ্চিরং ভাৱয সৌম্যরূপম্ ॥ **2** ॥

শ্রীমত্ত্রযীশেখর দেশিকস্য শ্রীৱেঙ্কটেশস্য ৱপুর্মনোজ্ঞম্ ।
আদিত্যৱর্ণং ৱিশদং মমাক্ষ্ণোঃ আপাদচূডাপদমাৱিরস্তু ॥ **3** ॥

নির্নিদ্রপঙ্কেরুহযুগ্মশোভা নিরাকৃতিপ্রৌঢপদাব্জযুগ্মম্ ।
নীরন্ধ্র নির্যন্নখচন্দ্রচন্দ্রা তপস্ফুটদ্ধ্যাতৃহৃদন্ধকারম্ ॥ **4** ॥

নিজার্থচন্দ্রোপমিতালকোদ্যন্ নিরন্তরোদ্ভাসি সিতোর্ধ্ৱপুণ্ড্রম্ ।
সিতাযতস্ৱচ্ছসরোজবন্ধং মুনেঃ শঠারেরিৱ মূর্তিভেদম্ ॥ **5** ॥

মুখেন্দ্ৱধঃ পাতি করোৎকরাকৃতি স্ফুটচ্ছৱিশ্মশ্রুপরিষ্কৃতোরসম্ ।
সিতোপৱীতং তুলসীসরোরুহ অক্ষমালিকালঙ্কৃতচারুকন্ধরম্ ॥ **6** ॥

অনঙ্গ সৌৱর্ণ নিষঙ্গকান্তি প্রসঙ্গভঙ্গাৱহ চারুজঙ্ঘম্ ।
লসৎককুদ্মৎককুদাভিরূপ্য নিতান্তনির্ভাসিতজানুযুগ্মম্ ॥ **7** ॥

রম্ভাৱরস্তম্ভ ৱিজৃম্ভমাণ দুর্গর্ৱসর্ৱঙ্কষ সক্থিদৃশ্যম্।
কটীতটশ্লিষ্টপৱিত্রশুভ্রান্তরীযনির্ভাসি নিতম্ববিম্বম্॥ **8** ॥

আৱর্তগর্তোজ্ৱল নাভি চক্রং অত্যাযতোরস্থলদীপ্যমানম্।
আজানু লম্ব্যাযত ৱৃত্ত বাহুং অতুন্নতাংসং শ্রিতগূঢজত্রুম্॥ **9** ॥

শঙ্খপ্রতিস্পর্ধিসুজাতকণ্ঠং শান্তোপমানাযিতকর্ণপাশম্।
সুস্নিগ্ধবদ্ধস্মিতচূতপোত নৱ্যপ্রৱালোপমিতাধরোষ্টম্॥ **10** ॥

সুনির্মলোদঞ্চিতমৌক্তিকালী জডীকৃতপ্রৌঢিমদন্তপঙ্ক্তিম্।
ৱিকাসিনাসাপুটকান্তিশান্ত প্রফুল্লতিল্যপ্রসৱাৱলেপম্॥ **11** ॥

নাসালসৎ কল্পলতা প্রসূন যুগাযিতাম্ভোরুহচারুনেত্রম্।
তৎসৌরভাঘ্রাণৱিনিশ্চলালি দ্ৱযোপমভ্রূযুগলাভিরামম্॥ **12** ॥

সুজাত চরণাম্বুজং সুদৃঢগুল্ফ জানূরুকং
    সিতান্তরকটীতটং সুভগনাভিৱক্ষোগলম্।
সুদীর্ঘযুগবাহুকং শুভকপোলনাসাক্ষিকং
    মনোরুচিরমালিকং কলয ৱেঙ্কটেশং গুরুম্॥ **13** ॥

রথাঙ্গজলজাঙ্কিতঃ সুললিতোর্ধ্ৱপুণ্ড্রোজ্জ্ৱলঃ
    সরোজতুলসীমণিগ্রথিতমালিকাভূষণঃ।
সিতাংশুকযুগাঞ্চিতঃ স্মিতমুখো দযাশীতলঃ
    চকাস্তু হৃদি মে সদা স গুরুৱেঙ্কটাধীশ্ৱরঃ॥ **14** ॥

য ইমাং দিনচর্যাং চ ৱিগ্রহধ্যানপদ্ধতিম্।
ৱরদার্যকৃতাং ভক্ত্যা শীলযেৎ মুক্ত এৱ সঃ॥ **15** ॥

॥ ইতি শ্রীমদ্বেদান্তদেশিক ৱিগ্রহধ্যানং সমাপ্তম্॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ॥